स्त्रियाः गर्भे । सहोढे गर्भे । जायते जन–ड । सहोढज तज्जाते पुत्रभेदे ।

**सहोदर** न० सह समानमुदरं यस्य । एकगर्भजाते भ्रातरि जटा० २भगिन्यां स्त्री एकपितृजाते ३भ्रातर्यपि उपचारात् । “देशे देशे कलत्राणि देशे देशे च बान्धवाः । तन्तु देशं न पश्यामि यत्र भ्राता सहोदरः” रामायणे लक्ष्मणविच्छेदे रामेण तस्य भिन्नोदरजातत्वेऽपि तथोक्तम्

**सहोर** त्रि० सह–ओर । साधौ उणादिकोषः ।

**सह्य** न० सहायस्य भावः यत् नि० । १साहाय्ये “तत्रार्थे सह्यमकरोत्” पुराणम् । सह भावे यत् । २आरोग्ये ३साम्ये ४माधुर्य्ये च शब्दर० । कर्मणि यत् । ५सोढव्ये त्रि० ६पुनाख्यदेशसमीपस्थे पर्वतभेदे पु० मेदि० । स च पर्वतः भारतवर्षस्य कुलाचलभेदः “माहेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलाचलाः” मार्कण्डेयपु० ५७अ० । स च अपरान्तदेशसन्निकृष्टो लवणसमुद्रात् कियद्दूरस्थश्च तदतिक्रमेणैव रघौ अपरान्तदेशगमनोक्तेः । “असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता । नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् । तस्यानीकैर्विसर्पद्भिः अपरान्तजयोद्यतैः । रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः” रघु० । तत्पर्वतपादजा नद्यश्च “तापी पयोष्णी निर्विन्ध्या कावेरी प्रमुखा नदी । गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा । सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः” विष्णुस० उक्ताः “गोदावरी भीमरथी कृष्णवेण्यास्तथाऽपरा । तुङ्गभद्रा सुप्रयोगा सह्यात् कावेर्य्यापगाः” मार्कण्डेयपु० ।

**सह्यात्मजा** स्त्री सह्यस्य आत्मजेव तत्प्रभवत्वात् । कावेर्य्यां हेमच० । सह्यशब्दे दृश्यम् ।

**सा** स्त्री सो–ड । १गौर्य्यां २लक्ष्म्याञ्च शब्दर० ।

**सांक्रमिक** त्रि० संक्रमे साधुः गुडा० ठञ् । संक्रमसाधने कुष्ठादिरोगे । वा परसवर्णः । सांक्रमिकरोगाश्च भावप्र० दर्शिता यथा ‘प्रसङ्गाद्गात्रसंस्पर्शान्निःश्वासात् सहभोजनात् । एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् । कण्डू कुष्ठोपदंशाश्च भूतोन्मादव्रणज्वराः (वसन्त) औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम् । स्रूयते यदि कुष्ठेन पुनर्जातस्य तद्भवेत् । अतो निन्दितरोगोऽयं कुष्ठं कष्टं प्रकीर्त्तितम्” । प्रसङ्गोऽत्र मैथुनम् भावप्र० ।

**सांख्य** न० संख्यायतेऽत्र संख्या सम्यग्ज्ञानं साऽस्त्यत्र अण् । १सम्यग्दर्शने ‘एषा तेऽभिहिता सांख्ये’ इति गीता संख्या मूलप्रकृत्यादिपदार्थानां गणनात्र प्रज्ञाद्यण् । २कपिलप्रणीते दर्शनशास्त्रभेदे परसवर्णे साङ्ख्यमप्युभयत्र ३सांख्योक्तयोगे पु० “पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्” भाग० १स्क० ३अ० । “सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते” मात्स्ये ३अ० ।

**सांख्यप्रवचन** न० सांख्योक्तमर्थं प्रवक्ति विस्तरेण कथयत्यनेन प्र+वच–करणे ल्युट् । तत्त्वसमासाख्यसूत्रार्थस्य विस्तरेण ज्ञापके १कपिलप्रणीते २पातञ्जलप्रणीते ग्रन्थभेदे यथोक्तं सांख्यप्र०भा० यथा

“नन्वेवमपि तत्त्वसमासाख्यसूत्रैः सहास्याः षडध्याय्याः पौनरुक्त्यमिति चेत् । नैवम् । सङ्क्षेपविस्तररूपेणोभयोरप्यपौनरुक्त्यात् । अत एवास्याः षडध्याया योगदर्शनस्येव सांख्यप्रवचनसंज्ञा युक्ता । तत्त्वसमासाख्यं हि यत् सङ्क्षिप्तं सांख्यदर्शनं तस्यैव प्रकर्षेणास्यां निर्वचनमिति । विशेषस्त्वयं यत् षडध्याय्यां तत्त्वसमासाख्योक्तार्थविस्तरमात्रं योगदर्शने त्वास्थामभ्युपगमवादप्रतिषिद्धस्यैश्वरस्य निरूपणेन न्यूनतापरिहारोऽपीति” “संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते । चतुर्विंशति तत्त्वानि तेन सांख्याः प्रकीर्त्तिताः” भा०

**सांग्रामिक** त्रि० संग्रामः प्रयोजनमस्य ठञ् । युद्धसाधने रथादौ । परसवर्णे साङ्ग्रामिक तत्रार्थे ।

**सांघातिक** त्रि० सङ्घाताय हितम् ठञ् । १सङ्घातकारके षड्नाडीचक्रस्थे २जन्मनक्षत्रावधिषोडशनक्षत्रे च “देहद्रविणबन्धूनां नाशः सांघातिके तथा” इति ज्योतिषम् । परसवर्णे साङ्घातिकमपि उभयत्र ।

**सांदृष्टिक** न० संदृष्टं प्रत्यक्षदृष्टमनुसरति ठक् । १दृष्टानुसारिन्यायभेदे संदृष्टं दृष्टमात्रं फलमस्य ठञ् । २सद्यःफले त्रि० अमरः । परसवर्णे सान्दृष्टिकमप्युभयत्र ।

**सांयात्रिक** पु० सम्यक् यात्रायै द्वीपान्तरगमनाय अलम् ठञ् । पोतेन वाणिज्यकारके अमरः ।

**सांयुगीन** त्रि० संयुगे युद्धे साधुः प्रतिजना० खञ् । रणकुशले अमरः ।

**सांराविण** न० सम्+रु-भावे णिनि ततः स्वार्थेऽण् । व्याप्नं [हट्टादिकोलाहले ।

**सांवत्सर** पु० संवत्सरं तज्ज्ञानोपयोगिशास्त्रं वेत्ति अधीते वा अण् । ज्योतिर्वेत्तरि १गणके अमरः । २वर्षसम्बन्धिनि त्रि०

**सांवत्सरिक** त्रि० संवत्सरे भवः ठञ् । प्रतिवर्षं कृताह्निकसंख्ये श्राद्धभेदे गोभिलः “अत ऊर्द्धं संवत्सरे संवत्सरे प्रेता०